# Natya Shastra Chapter 29

# નાટ્યશાસ્ત્રમ્ અધ્યાયઃ ૨૯ તતાતોદ્યવિધાનમ્

## Document Information

Text title : naaTyashaastra adhyaaya 29 tataatodyavidhaanaM

File name : natya29.itx

Category : nATyashAstra, major_works, bharata

Location : doc_z_misc_major_works

Author : Sage Bharata

Transliterated by : Sowmya Krishnapur krsowmya at yahoo.com

Proofread by : Sowmya Krishnapur krsowmya at yahoo.com

Latest update : October 29. 2008

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 24, 2024

*sanskritdocuments.org*

# નાટ્યશાસ્ત્રમ્ અધ્યાયઃ ૨૯ તતાતોદ્યવિધાનમ્

॥ શ્રીરસ્તુ ॥

ભરતમુનિપ્રણીતં નાટ્યશાસ્ત્રમ્

અથ એકોનત્રિંશત્તમોऽધ્યાયઃ

ષડ્જોદીચ્યવતી ચૈવ ષડ્જમધ્યા તથૈવ ચ ।
મધ્યપઞ્ચમબાહુલ્યાત્ કાર્યા શ‍ૃઙ્ગારહાસ્યયોઃ ॥ ૧॥

ષાડ્જી ત્વથાર્ષભી ચૈવ સ્વસ્વરાંશપરિગ્રહાત્ ।
વીરરૌદ્રાદ્ભુતેષ્વેતે પ્રયોજ્યે ગાનયોક્તૃભિઃ ॥ ૨॥

નિષાદેऽંશે તુ નૈષાદી  ગાન્ધારે ષડ્જકૈશિકી ।
કરુણે તુ રસે કાર્યા જાતિગાનવિશારદૈઃ ॥ ૩॥

ધૈવતી ધૈવતાંશે તુ બીભત્સે સભયાનકે ।
ધ્રુવાવિધાને કર્તવ્યા જાતિર્ગાને પ્રયત્નતઃ ।
રસં કાર્યમવસ્થાં ચ જ્ઞાત્વા યોજ્યા પ્રયોક્તૃભિઃ ।
ષડ્જગ્રામાશ્રિતા હ્યેતાઃ પ્રયોજ્યા જાતયો બુધૈઃ ॥ ૪॥

અતઃ પરં પ્રવક્ષ્યામિ મધ્યમગ્રામસંશ્રયાઃ ।
ગાન્ધારીરક્તગાન્ધાર્યૌ ગાન્ધારાંશોપપત્તિતઃ ।
કરુણે તુ રસે કાર્યે નિષાદેऽંશે તથૈવ ચ ॥ ૫॥

મધ્યમા પઞ્ચમી ચૈવ નન્દયન્તી તથૈવ ચ ।
ગાન્ધારપઞ્ચમી ચૈવ મધ્યમોદીચ્યવા તથા ।
મધ્યમપઞ્ચમબાહુલ્યાત્ કાર્યાઃ શ‍ૃઙ્ગારહાસ્યયોઃ ॥ ૬॥

કાર્માારવી તથા ચાન્ધ્રી ગાન્ધારોદીચ્યવા તથા ।
વીરે રૌદ્રેऽદ્ભુતે કાર્યાઃ ષડ્જર્ષભાંશયોજિતાઃ ।
કૈશિકી ધૈવતાંશે તુ બીભત્સે સભયાનકે ॥ ૭॥

એકૈવ ષડ્જમધ્યા જ્ઞેયા સર્વરસસંશ્રયા જાતિઃ ।

તસ્યાસ્ત્વંશાઃ સર્વે સ્વરાસ્તુ વિહિતાઃ પ્રયોગવિધૌ ॥ ૮॥

યો યદા બલવાન્ યસ્મિન્ સ્વરો જાતિસમાશ્રયાત્ ।
તત્પ્રવૃત્તં રસે કાર્યં ગાનં ગેયે પ્રયોક્તૃભિઃ ॥ ૯॥

મધ્યપઞ્ચમભૂયિષ્ઠં ગાનં શ‍ૃઙ્ગારહાસ્યયોઃ ।
ષડ્જર્ષભપ્રાયકૃતં વીરરૌદ્રાદ્ભુતેષુ ચ ॥ ૧૦॥

ગાન્ધારઃ સપ્તમશ્ચાયં કરુણે ગાનમિષ્યતે ।
તથા ધૈવતભૂયિષ્ઠં બીભત્સે સભયાનકે ॥ ૧૧॥

એકૈવ ષડ્જમધ્યા વિજ્ઞેયાખિલરસાશ્રયા જાતિઃ ।
તસ્યાસ્ત્વંશાઃ સર્વે સ્વરાશ્ચ વિહિતાઃ પ્રયોગવિધૌ ॥ ૧૨॥

સર્વેષ્વંશેષુ રસા નિયમવિધાનેન સમ્પ્રયોક્તવ્યાઃ ।
કાકલ્યન્તરવિહિતા વિશેષયુક્તાસ્તુ બલવન્તઃ ।
એવમેતા બુધૈર્જ્ઞેયા જાતયો નાટ્યસંશ્રયાઃ ॥ ૧૩॥

પાઠ્યપ્રયોગવિહિતાન્ સ્વરાંશ્ચાપિ નિબોધત ।
હાસ્યશ‍ૃઙ્ગારયોઃ કાર્યૌ સ્વરૌ મધ્યમપઞ્ચમૌ ।
ષડ્જર્ષભૌ ચ કર્તવ્યૌ વીરરૌદ્રાદ્ભુતેષ્વથ ॥

ગાન્ધારશ્ચ નિષાદશ્ચ કર્તવ્યૌ કરુણે રસે ।
ધૈવતશ્ચ પ્રયોગજ્ઞૈર્બીભત્સે સભયાનકે ॥

અત ઊર્ધ્વં પ્રવક્ષ્યામિ વર્ણાલઙ્કારલક્ષણમ્ ।
આરોહી ચાવરોહી ચ સ્થાયિસઞ્ચારિણૌ તથા ।
વર્ણાશ્ચત્વાર એવૈતે હ્યલઙ્કારાસ્તદાશ્રયાઃ ॥ ૧૪॥

આરોહન્તિ સ્વરા યત્રારોહીતિ સ તુ સંજ્ઞિતઃ ।
યત્ર ચૈવાવરોહન્તિ સોઽવરોહી પ્રકીર્તિતઃ ॥ ૧૫॥

સ્થિરાઃ સ્વરાઃ સમા યત્ર સ્થાયી વર્ણઃ સ ઉચ્યતે ।
સઞ્ચરન્તિ સ્વરા યત્ર સ સઞ્ચારીતિ કીર્તિતઃ ॥ ૧૬॥

શારીરસ્વરસમ્ભૂતાસ્ત્રિસ્થાનગુણગોચરાઃ ।
ચત્વારો લક્ષણોપેતા વર્ણાસ્તત્ર પ્રકીર્તિતાઃ ॥ ૧૭॥

એવં લક્ષણસંયુક્તં યદા વર્ણોઽનુકર્ષતિ ।
તદા વર્ણસ્ય નિષ્પત્તિર્જ્ઞેયા સ્વરસમુદ્ભવા ॥ ૧૮॥

એતે વર્ણાસ્તુ વિજ્ઞેયાશ્ચત્વારો ગીતયોજકાઃ ।
એતાન્ સમાશ્રિતાન્ સમ્યગલઙ્કારાન્ નિબોધત ॥ ૧૯॥

પ્રસન્નાદિઃ પ્રસન્નાન્તઃ પ્રસન્નાદ્યન્ત એવ ચ ।
પ્રસન્નમધ્યશ્ચ તથા ક્રમરેચિત એવ ચ ।
પ્રસ્તારશ્ચ પ્રસાદશ્ચ સમૈતે સ્થાયિવર્ણગાઃ ॥ ૨૦॥

અથ સઞ્ચારિજાન્ ભૂયઃ કીર્ત્યમાનાન્નિબોધત ।
મન્દ્રસ્તથા પ્રસન્નાદિઃ પ્રેઙ્ખિતો બિન્દુરેવ ચ ।
સન્નિવૃત્તઃ પ્રવૃત્તશ્ચ રેચિતઃ કમ્પિતઃ સમઃ ॥ ૨૧॥

કુહરશ્ચૈવ વેણુશ્ચ રઞ્ચિતો હ્યવલોકિતઃ ।
આવર્તકઃ પરાવૃત્તઃ સઞ્ચારિણ્યશ્ચતુર્દશ ॥ ૨૨॥

નિષ્કર્ષોભ્યુચયશ્ચૈવ હસિતો બિન્દુરેવ ચ ।
પ્રેઙ્ખોલિતસ્તથાક્ષિપ્તો વિસ્તીર્ણોદ્ઘટિતસ્તથા ॥ ૨૩॥

હ્રાદમાનઃ સમ્પ્રદાનઃ સન્ધિઃ પ્રચ્છાદનસ્તથા ।
પ્રસન્નાદિઃ પ્રસન્નાન્ત ઇત્યારોહે ત્રયોદશ ॥ ૨૪॥

વિધૂતશ્ચ ત્રિવર્ણશ્ચ તથોદ્વાહિત એવ ચ ।
ઉદ્ગીતશ્ચ તથા વેણિર્વિજ્ઞેયા હ્યવરોહિણઃ ॥ ૨૫॥

સપ્તરૂપગતા જ્ઞેયા અલઙ્કારા બુધૈસ્ત્વિમે ।
નૈતે સર્વે ધ્રુવાસ્વિષ્ટાઃ શ્રુતિવર્ણપ્રકર્ષણાત્ ॥ ૨૬॥

ન હિ વર્ણપ્રકર્ષસ્તુ ધ્રુવાણાં સિદ્ધિરિષ્યતે ।
શ્યેનો વાપ્યથવા બિન્દુર્યે ચાન્યેતિ પ્રકર્ષિણઃ ॥ ૨૭॥

તે ધ્રુવાણાં પ્રયોગેષુ ન કાર્યાઃ સ્વપ્રમાણતઃ ।
તદ્ધ્રુવાણાં પ્રયોગે તુ કાર્યા હ્યારોહિણઃ સ્વરાઃ ॥ ૨૮॥

યસ્માદર્થાનુરૂપા હિ ધ્રુવા કાર્યાર્થદર્શિકા ।
વર્ણાનાં તુ પુનઃ કાર્યં કૃશત્વં પદસંશ્રયમ્ ॥ ૨૯॥

યેઽત્ર પ્રયોગે ગચ્છન્તિ તાંશ્ચ વર્ણાન્ નિબોધત ।
પ્રસન્નાદિઃ પ્રસન્નાન્તઃ પ્રસન્નાદ્યન્ત એવ ચ ॥ ૩૦॥

પ્રસન્નમધ્યમશ્ચૈવ બિન્દુઃ કમ્પિતરેચિતૌ ।
તારશ્ચૈવ હિ મન્દ્રશ્ચ તથા તારતરઃ પુનઃ ।

પ્રેઙ્ખોલિતસ્તારમન્દ્રો મન્દ્રતારઃ સમસ્તથા ॥ ૩૧॥

સન્નિવૃત્તઃ પ્રવૃત્તશ્ચ પ્રસાદોઽપાઙ્ગ એવ ચ ।
ઊર્મિઃ પ્રેઙ્ખોઽવલોકશ્ચ ઇત્યેતે સર્વવર્ણગાઃ ॥ ૩૨॥

સ્થાયિવર્ણાદૃતે ચૈષાં સમ્પ્રવક્ષ્યામિ લક્ષણમ્ ।
ક્રમશો દીપિતો યઃ સ્યાત્ પ્રસન્નાદિઃ સ કથ્યતે ॥ ૩૩॥

વ્યસ્તોચ્ચારિત એવૈષ પ્રસન્નાન્તો વિધીયતે ।
આદ્યન્તયોઃ પ્રસન્નત્વાત્ પ્રસન્નાદ્યન્ત ઇષ્યતે ॥ ૩૪॥

પ્રસન્નમધ્યો મધ્યે તુ પ્રસન્નત્વાદુદાહૃતઃ ।
સર્વસામ્યાત્ સમો જ્ઞેયઃ સ્થિતસ્ત્વેકસ્વરોઽપિ યઃ ॥ ૩૫॥

આદિમધ્યલયો યત્ર સ ચોર્મિરિતિ સંજ્ઞિતઃ ।
શ્રુતયોઽન્ત્યાદ્ દ્વિતીયસ્ય મૃદુમધ્યાયતાઃ સ્વરાઃ ॥ ૩૬॥

આયતત્વં ભવેન્નીચે મૃદુત્વં તુ વિપર્યયે ।
સ્વે સ્વરે મધ્યમત્વં ચ મૃદુમધ્યમયોસ્તથા ।
દીપ્તાયતે કરુણાનાં શ્રુતીનામેષ નિશ્ચયઃ ॥ ૩૭॥

બિન્દુરેકકલો જ્ઞેયઃ કમ્પિતશ્ચ કલાદ્વયમ્ ।
ગતાગતપ્રવૃત્તો યઃ સ પ્રેઙ્ખોલિત ઇષ્યતે ॥ ૩૮॥

યસ્તુ કણ્ઠે સ્વરોઽધઃ સ્યાત્ સ તુ તારઃ પ્રકીર્તિતઃ ।
ઉરોગતસ્તથા મન્દ્રો મૂર્ધ્નિ તારતરસ્તથા ॥ ૩૯॥

ક્રમાગતસ્તુ યસ્તારઃ ષષ્ઠઃ પઞ્ચમ એવ વા ।
તારમન્દ્રપ્રસન્નસ્તુ જ્ઞેયો મન્દ્રગતઃ સ ચ ॥ ૪૦॥

લઙ્ઘયિત્વા પરાન્ મન્દ્રાત્ પરાં તારગતિં ગતઃ ।
મન્દ્રતારપ્રસન્નસ્તુ વિજ્ઞેયો હ્યવરોહણાત્ ॥ ૪૧॥

પ્રસન્નાન્તઃ સ્વરો યત્ર પ્રસાદઃ સ તુ સંજ્ઞિતઃ ।
અપાઙ્ગકિસ્તુ વિજ્ઞેયઃ સ્વરાણામથ સઞ્ચરાત્ ॥ ૪૨॥

રેચિતઃ શિરસિ જ્ઞેયઃ કમ્પિતં તુ કલાત્રયમ્ ।
કણ્ઠે નિરુદ્ધપવનઃ કુહરો નામ જાયતે ॥ ૪૩॥

એવમેતે ત્વલઙ્કારા વિજ્ઞેયા વર્ણસંશ્રયાઃ ।
અથ ગીતીઃ પ્રવક્ષ્યામિ છન્દોઽક્ષરસમન્વિતાઃ ॥ ૪૪॥

શશિના રહિતેવ નિશા વિજલેવ નદી લતા વિપુષ્પેવ ।
અવિભૂષિતેવ ચ સ્ત્રી ગીતિરલઙ્કારહીના સ્યાત્ ॥ ૪૫॥

પ્રથમા માગધી જ્ઞેયા દ્વિતીયા ચાર્ધમાગધી ।
સમ્ભાવિતા તૃતીયા તુ ચતુર્થી પૃથુલા સ્મૃતા ॥ ૪૬॥

ત્રિનિવૃત્તપ્રગીતા યા ગીતિઃ સા માગધી સ્મૃતા ।
અર્ધતઃ સન્નિવૃત્તા ચ વિજ્ઞેયા હ્યર્ધમાગધી ॥ ૪૭॥

સમ્ભાવિતા ચ વિજ્ઞેયા ગુર્વક્ષરસમન્વિતા ।
પૃથુલાખ્યા ચ વિજ્ઞેયા નિત્યં લઘ્વક્ષરાન્વિતા ॥ ૪૮॥

એતાસ્તુ ગીતયો જ્ઞેયા ધ્રુવાયોગં વિનૈવ હિ ।
ગાન્ધર્વ એવ યોજ્યાસ્તુ નિત્યં ગાનપ્રયોક્તૃભિઃ ॥ ૪૯॥

ગીતયો ગદિતાઃ સમ્યગ્ ધાતૂંશ્ચૈવ નિબોધત ।
વિસ્તારઃ કરણશ્ચ સ્યાદાવિદ્ધો વ્યઞ્જનસ્તથા ।
ચત્વારો ધાતવો જ્ઞેયા વાદિત્રકરણાશ્રયાઃ ॥ ૫૦॥

સઙ્ઘાતજોઽથ સમવાયજશ્ચ વિસ્તારજોઽનુબન્ધકૃતઃ ।
જ્ઞેતશ્ચતુષ્પ્રકારો ધાતુર્વિસ્તારસંજ્ઞશ્ચ ॥ ૫૧॥

વિધયસ્તુ સ્મૃતાસ્તસ્ય પૂર્વં વિસ્તાર એવ ચ ।
સઙ્ઘાતસમવાયૌ તુ વિજ્ઞેયૌ તૌ દ્વિઅત્રિકૌ ॥ ૫૨॥

પૂર્વશ્ચતુર્વિધસ્તત્ર પશ્ચિમોઽષ્ટવિધઃ સ્મૃતઃ ।
કરણાનાં વિશેષેણ વિજ્ઞેયૌ તૌ પૃથક્ પૃથક્ ॥ ૫૩॥

અધશ્ચોર્ધ્વં ચ વિજ્ઞેયાવધરોત્તરજૌ સ્વરૌ ।
સઙ્ઘાતજો વિધિસ્ત્વેષ વિજ્ઞેયો વાદનં પ્રતિ ॥ ૫૪॥

દ્વિરુત્તરો દ્વિરધરસ્ત્વધરાદિશ્ચોત્તરાવસાનશ્ચ ।
જ્ઞેયસ્તથોત્તરાદિઃ પુનરપ્યધરાવસાનશ્ચ ॥ ૫૫॥

સમવાયજસ્તથા સ્યાત્ ત્રિરુત્તરસ્ત્રિરધરશ્ચ વિજ્ઞેયઃ ।
દ્વિરધરોત્તરાધરાન્તો દ્વિરધરશ્ચોત્તરવિરામશ્ચ ॥ ૫૬॥

ઉત્તરમુખો દ્વિરધરો દ્વિરુત્તરાવસાનશ્ચ ।
મધ્યોત્તરો દ્વિરધરો દ્વિરુત્તરોઽપ્યધરમધ્યશ્ચ ॥ ૫૭॥

અનુબન્ધસ્તુ જ્ઞેયો વ્યાસસમાસાચ્ચ નિયતમેષાં હિ ।
એવં ચતુર્દશવિધો વિસ્તારો ધાતુરાખ્યાતઃ ॥ ૫૮॥

રિભિતોચ્ચયનીરિભિતો હ્રાદસ્તુ તથાનુબન્ધઃ સ્યાત્ ।
પઞ્ચવિધો વિજ્ઞેયો વીણાવાદ્યે કરણધાતુઃ ॥ ૫૯॥

ત્રિકપઞ્ચસપ્તનવકૈર્યથાક્રમં સંયુતો ભવેદ્વાદ્યે ।
સર્વૈરનુબન્ધકૃતૈર્ગુર્વન્તઃ સ્યાત્ કરણધાતુઃ ॥ ૬૦॥

ક્ષેપઃ પ્લુતોઽતિપાતોઽતિકીર્ણમનુબન્ધસંજ્ઞિતશ્ચૈવ ।
આવિદ્ધો વિષ્ટો યો ધાતુર્વૈ પઞ્ચવિધ એવ ॥ ૬૧॥

દ્વિત્રિચતુષ્કનવકૈઃ પ્રહારૈઃ ક્રમશઃ કૃતૈઃ ।
આવિદ્ધધાતુર્વિજ્ઞેયઃ સાનુબન્ધવિભૂષિતઃ ॥ ૬૨॥

વ્યઞ્જનધાતોઃ પુષ્પં કલતલનિષ્કોટિતં તથોદ્ધૃષ્ટમ્ ।
રેફોઽનુબન્ધસંજ્ઞોઽનુસ્વનિતં બિન્દુરવમૃષ્ટમ્ ॥ ૬૩॥

કનિષ્ઠાઙ્ગુષ્ઠસંયુક્તં પુષ્પમિત્યભિસંજ્ઞિતમ્ ।
અઙ્ગુષ્ઠાભ્યાં સમં તન્ત્ર્યોઃ સ્પર્શનં યત્ કલં તુ તત્ ॥ ૬૪॥

વામેન પીડનં કૃત્વા દક્ષિણેનાહતિસ્તલે ।
સવ્યાઙ્ગુષ્ઠપ્રહારસ્તુ નિષ્કોટિતમિહોચ્યતે ॥ ૬૫॥

પ્રહારો વામતર્જન્યા ઉદ્ધૃષ્ટમિતિ સંજ્ઞિતમ્ ।
સર્વાઙ્ગુલિસમાક્ષેપો રેફ ઇત્યભિસંજ્ઞિતઃ ।૬૬॥

તલસ્થાનેઽધસ્તન્ત્રીણામનુસ્વનિતમુચ્યતે ।
ગુર્વક્ષરકૃતા તન્ત્રી બિન્દુરિત્યભિસંજ્ઞિતઃ ॥ ૬૭॥

કનિષ્ઠાઙ્ગુષ્ઠકાભ્યાં તુ દક્ષિણાભ્યામધોમુખમ્ ।
તન્ત્રીષુ ત્રિપ્રહારં ચાપ્યવમૃષ્ટં પ્રકીર્તિતમ્ ॥ ૬૮॥

વ્યાસસમાસાદેષામનુબન્ધઃ સાર્વધાતુકો જ્ઞેયઃ ।
ઇતિ દશવિધઃ પ્રયોજ્યો વીણાયાં વ્યઞ્જનો ધાતુઃ ॥ ૬૯॥

ઇત્યેતે ધાતવઃ પ્રોક્તાશ્ચત્વારો લક્ષણાન્વિતાઃ ।
તિસૃણામપિ વૃત્તીનાં યેષુ વાદ્યં પ્રતિષ્ઠિતમ્ ॥ ૭૦॥

તિસ્રસ્તુ વૃત્તયશ્ચિત્રાદક્ષિણાવૃત્તિસંજ્ઞિતાઃ ।
વાદ્યગીતોભયગુણા નિર્દિષ્ટાન્તા યથાક્રમમ્ ॥ ૭૧॥

તિસ્રો ગીતિવૃત્તયઃ પ્રાધાન્યેન ગ્રાહ્યાઃ । ચિત્રા વૃત્તિર્દક્ષિણા ચેતિ । તાસાં તાલગીતિલયયતિમાર્ગપ્રાધાન્યાનિ યથાસ્વં વ્યઞ્જકાનિ ભવન્તિ । તત્ર ચિત્રાયાં સઙ્ક્ષિપ્તવાદ્યતાલદ્રુતલયસમાયત્યનાગતગ્રહાણાં પ્રાધાન્યમ્ । તથા વૃત્તૌ ગીતવાદિત્રદ્વિકલાતાલમધ્યલયસ્રોતોગતાયતિસમગ્રહમાર્ગાણાં પ્રાધાન્યમ્ । દક્ષિણાયાં ગીતિચતુષ્કલતાલવિલમ્બિતલયગોપુચ્છાયત્યતીતગ્રહમાર્ગાણાં પ્રાધાન્યમ્ ।

સર્વાસામેવ વૃત્તીનાં લલિતાદ્યાસ્તુ જાતયઃ ।
ધાતુભિઃ સહ સંયુક્તા ભવન્તિ ગુણવત્તરાઃ ॥ ૭૨॥

એતેષાં ધાતૂનાં સમવાયાજ્જાતયસ્તુ જાયન્તે ।
સ્યાદુદાત્તલલિતરિભિતઘનસંજ્ઞાશ્ચતસ્રસ્તુ ॥ ૭૩॥

તત્રોદાતા વિસ્તારધાતુવિષયા હ્યુદાત્તત્વાત્ ।
લલિતા વ્યઞ્જનધાતોર્લલિતત્વાદેવ સમ્પ્રયોક્તવ્યા ॥ ૭૪॥

આવિદ્ધધાતુવિષયા રિભિતા લઘુસઞ્ચયાદ્ વિનિર્દિષ્ટા ।
કરણવિષયા ચ ઘનસંજ્ઞા ગુરુલઘુસઞ્ચયાત્તુ સ્યાત્ ॥ ૭૫॥

ત્રિવિધં ગીતે કાર્યં વાદ્યં વીણાસમુદ્ભવં તજ્જ્ઞૈઃ ।
તત્ત્વં હ્યનુગતમોઘઃ સ્થાનૈકકરણસમાયુક્તાઃ ॥ ૭૬॥

લયતાલવર્ણપદયતિગીત્યક્ષરભાવકં ભવેત્ તત્ત્વમ્ ।
ગીતં તુ યદનુગચ્છત્યનુગતમિતિ તદ્ભવેદ્વાદ્યમ્ ॥ ૭૭॥

આવિદ્ધકરણબહુલં હ્યુપર્યુપરિપાણિકં દ્રુતલયં ચ ।
અનપેક્ષિતગીતાર્થં વાદ્યં ત્વોઘે વિધાતવ્યમ્ ॥ ૭૮॥

એવં જ્ઞેયા વૈણે વાદ્યવિધાને તુ ધાતવસ્તજ્જ્ઞૈઃ ।
લક્ષ્યામ્યતઃ પરમહં નિર્ગીતવિધાનસમવાયમ્ ॥ ૭૯॥

આશ્રાવણા તથાઽરમ્ભો વક્ત્રપાણિસ્તથૈવ ચ ।
સઙ્ખોટના તથા કાર્યં પુનશ્ચ પરિઘટ્ટના ॥ ૮૦॥

માર્ગાસારિતમેતત્ સ્યાલ્લીલાકૃતમથાપિ ચ ।
આસારિતાનિ ચ તથા ત્રિપ્રકારકૃતાનિ તુ ॥ ૮૧॥

એતાનિ તુ બહિર્ગીતાન્યાહુર્વાદ્યવિદો જનાઃ ।
સતાલાનિ હ્યતાલાનિ ચિત્તવૃત્તૌ કૃતાનિ તુ ॥ ૮૨॥

પ્રયોજનં ચ વિજ્ઞેયં પૂર્વરઙ્ગવિધિં પ્રતિ ।
એતેષાં સમ્પ્રવક્ષ્યામિ લક્ષણં સનિદર્શનમ્ ॥ ૮૩॥

આસ્રાવણા નામ ।
વિસ્તારધાતુવિહિતૈઃ કરણૈઃ પ્રવિભાગશો દ્વિરભ્યસ્તૈઃ ।
દ્વિશ્ચાપિ સન્નિવૃત્તૈઃ કરણોપચયૈઃ ક્રમેણ સ્યાત્ ॥ ૮૪॥

ગુરુણી ત્વાદાવેકાદશકં ચતુર્દશં સપઞ્ચદશમ્ ।
સચતુર્વિંશકમેવં દ્વિગુણીકૃતમેતદેવ સ્યાત્ ॥ ૮૫॥

લઘુની ગુરુ ચૈવ સ્યાદથાષ્ટમં ગુરુ ભવેત્તથા ચ પુનઃ ।
ષટ્ ચ લઘૂનિ તતોઽન્ત્યે ગુર્વાદ્યાશ્રાવણાયાં તુ ॥ ૮૬॥

ત્રિઃશમ્યોપરિપાણૌ તાલાવપ્યેવમેવ ચૈકિકવાન્ ।
સમપાણૌ દ્વે શમ્યે તાલાવપ્યેવમેવાથ ॥ ૮૭॥

ભૂયઃ શમ્યાતાલાવવપાણાવુત્તરસ્થા ચૈવ ।
ચઞ્ચત્પુટસ્તથા સ્યાદેવં હ્યાશ્રાવણાતાલઃ ॥ ૮૮॥

અત્રોદાહરણમ્ ।
જ઼્હણ્ટું જગતિ યવલિતક જમ્બુક ઝણ્ટું તિતિ ચ લઘુ ચ ઝણ્ટુમ્ ।
દિઙ્ગલે ગણપતિપશુપતિજમ્બુક દિઙ્ગલે વરભુજ દિગિનગિ ચા ।
તિતિ ચાદિનિ નિગિચા પશુપતિ નીતિચા ॥

અથારમ્ભઃ ।
દીર્ઘાણ્યાદાવષ્ટૌ દ્વાદશ ચ લઘૂનિ નૈધનં ચૈવ ।
ચત્વારિ ગુરૂણિ તથા હ્રસ્વાન્યષ્ટૌ ચ દીર્ઘં ચ ॥ ૮૯॥

લઘુસંજ્ઞાનિ ચતુર્ધા નિધનં દ્વિગુણીકૃતાનિ દીર્ઘે દ્વે ।
અષ્ટૌ લઘૂનિ નૈધનમિત્યારમ્ભેઽક્ષરવિધાનમ્ ॥ ૯૦॥

અત્રોદાહરણમ્ ।
જ઼્હણ્ટું ઝણ્ટું ઝણ્ટું ઝણ્ટું જગતિ યવલિતક દિગિનિગિચા ।
દિઙ્ગલે દિઙ્ગલે તિતિ ઝઝલકુચઝલજમ્બુક તિતિચા ।
ગણપતિ સુરપતિ પશુપતિ ચા ॥

અસ્ય તુ વાદ્યમ્ ।
કાર્યં ત્રિપર્વરહિતૈરુદ્ઘહનૈરપ્યથ સમવરોહૈઃ ।
તલરિભિતહ્રાદયુતૈઃ કરણૈર્વિસ્તારભૂયિષ્ઠૈઃ ॥

અપચયયુક્તૈર્દ્વિસ્ત્રિસ્તથા નિવૃત્તૈર્દ્વિરભ્યસ્તૈઃ ।
આરમ્ભોઽપ્યવતરણસ્ત્રિપર્વયુક્તૈશ્ચ કર્તવ્યઃ ॥

તાલસ્ત્રિકલસ્ત્વાદૌ શમ્યૈકકલા કલાદ્વયે તાલઃ ।
દ્વિકલા ચ પુનઃ શમ્યા તાલો દ્વિકલશ્ચ કર્તવ્યઃ ॥ ૯૧॥

ત્રિકલશ્ચ સન્નિપાતઃ પુનઃ પિતાપુત્રકશ્ચ ષટ્પૂર્વઃ ।
ચચ્ચત્પુટસ્તથા સ્યાદારમ્ભે તાલયોગસ્તુ ॥ ૯૨॥

અસ્ય તુ વાદ્યમ્ ।
કાર્યં ત્રિપર્વરહિતૈરુદ્ઘહનૈરપ્યથ સમવરોહૈઃ ।
તલરિભિતહ્રાદયુતૈઃ કરણૈર્વિસ્તાભૂયિષ્ઠૈઃ ॥ ૯૩॥

અપચયયુક્તૈર્દ્વિસ્ત્રિસ્તથા નિવૃત્તૈર્દ્વિરભ્યસ્તૈઃ ।
આરમ્ભોઽપ્યવતરણસ્ત્રિપર્વયુક્તૈશ્ચ કર્તવ્યઃ ॥ ૯૪॥

અથ વક્ત્રપાણિઃ ।
ગુરૂણિ પઞ્ચ હ્રસ્વાનિ ષડ્ગુરુશ્ચ ચતુર્ગુણઃ ।
ગુરુણી દ્વે લઘુ ત્વેકં ચત્વાર્યથ ગુરૂણિ હિ ॥ ૯૫॥

ચત્વાર્યથ લઘૂનિ સ્યુસ્ત્રીણિ દીર્ઘાણિ ચૈવ હિ ।
લઘૂન્યષ્ટૌ ચ દીર્ઘં ચ વક્ત્રપાણૌ ભવેદ્વિધિઃ ॥ ૯૬॥

અત્રોદાહરણમ્ ।
દિઙ્ગલે ઝણ્ટું જમ્બુક જગતિ ય ઝણ્ટું દિઙ્ગલે ।
ઘેન્દૃ ઘેટો ઘાટો ભટ્ટુનકિટિ ઇનં દુઙ્ ॥

ઘદુગદુકિટમટનમ્ ।
અસ્ય વાદ્યમ્ ।
આવિદ્ધકરણયુક્તો દ્વ્યઙ્ગઃ સ્યાદેકપ્રવૃત્તૌ વા ।
અલ્પવ્યઞ્જનધાતુર્વાદ્યવિધિર્વક્ત્રપાણૌ તુ ॥ ૯૭॥

દ્વિકલે મદ્રકે યત્તુ શમ્યાતાલાદિપાતમ્ ।
તત્સર્વં વક્ત્રપાણૌ તુ કાર્યમષ્ટકલાન્વિતમ્ ॥ ૯૮॥

તસ્યાધસ્તાત્ પુનઃ કાર્યં પઞ્ચપાણિચતુષ્ટયમ્ ।
વક્ત્રપાણેરયં તાલો મુખપ્રતિમુખાશ્રયઃ ॥ ૯૯॥

અથ સઙ્ખોટના ।
ગુરુણી લઘૂન્યથાષ્ટૌ દીર્ઘં દ્વિગુણં તથા ચ કર્તવ્યમ્ ।
લઘુદીર્ઘે લઘુ ચ પુનશ્ચતુર્ગુણં સમ્પ્રકર્તવ્યમ્ ॥ ૧૦૦॥

પુનરષ્ટૌ હ્રસ્વાનિ સ્યુરિહ તથા નૈધનં ચ કર્તવ્યમ્ ।
સઙ્ખોટનવસ્તુવિધૌ હ્રસ્વગુરુવિધિઃ સમુદ્દિષ્ટઃ ॥ ૧૦૧॥

સઙ્ખોટનાયા ઉદાહરણં પ્રકલ્પ્ય કૃતમ્ ।
દિઙ્ગલે જગતિ ય વલતિ કતેચાતિચાતિઝ લઘુ ચઝલ પશુપતિચા ।
અસ્યા વાદ્યવિધિઃ ।
અધિદણ્ડં હસ્તાભ્યાં વીણાં વિનિગૃહ્ય દક્ષિણાઙ્ગુલ્યા ।
અઙ્ગુષ્ઠાભ્યાં ચ તથા કાર્યં સઙ્ખોટનાવાદ્યમ્ ॥ ૧૦૨॥

સઙ્ખોટયેત્ સ્વરં વાદિના તુ સંવાદિના તથાધિબલમ્ ।
સમવાયિભિશ્ચ શેષૈરનુવાદિભિરલ્પકૈશ્ચાંશૈઃ ॥ ૧૦૩॥

વિસ્તારચિત્રકરણૈર્દ્વિસ્ત્રિર્વિનિવર્તિતૈર્દ્વિરભ્યસ્તૈઃ ।
ઉપચયયુક્તૈઃ ક્રમશો વદન્તિ સઙ્ખોટનાવાદ્યમ્ ।
તાલોઽસ્યા ગદિતસ્તજ્જ્ઞૈઃ શીર્ષવત્ પઞ્ચપાણિના ॥ ૧૦૪॥

અથ પરિઘટ્ટના ।
દીર્ઘાણ્યાદાવષ્ટૌ લઘૂનિ કુર્યાત્ પુનર્દ્વિગુણિતાનિ ।
હ્રસ્વાન્યપિ ચત્વારિ દ્વિગુણાનિ સ્યુઃ સદીર્ઘાણિ ॥ ૧૦૫॥

ષોડશ લઘૂનિ ચ સ્યુઃ સહ નિધને ચૈવ કાર્યાણિ ।
એષ પરિઘટ્ટનાયાં ગુરુલઘુવસ્તુક્રમઃ પ્રોક્તઃ ॥ ૧૦૬॥

એતસ્યામપ્યુદાહરણં પ્રકલ્પ્ય કૃતમ્ ।
દિઙ્ગલે દિઙ્ગલે દિઙ્ગલે દિઙ્ગલે જગતિ ય વલતિ ક ।
તિતિઝલકુચઝલદિગિનિગિ ગણપતિ ચા ।
ચલતિ ક ગણપતિ પશુપતિસુરપતિ ચા ।
વાદ્યં ચાસ્યાસ્તજ્જ્ઞૈઃ સોદ્વહનં હસ્તલાઘવાત્ કાર્યમ્ ।
વ્યઞ્જનધાતુસમુત્થં નાનાકરણાશ્રયોપેતમ્ ॥ ૧૦૭॥

સમ્પિષ્ટકવચ્ચાસ્યાસ્તાલઃ કરણૈસ્તુ ધાતુસંયુક્તૈઃ ।

ગુરુલઘુયોગાદેવં વિહિતઃ કાર્યો બુધૈર્નિત્યમ્ ॥ ૧૦૮॥

માર્ગાસારિતવાદ્યં વિસ્તારાવિદ્ધકરણસંયુક્તમ્ ।
સકલૈઃ સતલૈઃ કરણૈરથ ગુરુલઘુસઞ્ચયશ્ચાયમ્ ॥ ૧૦૯॥

ચત્વારિ ગુરૂણિ સ્યુર્લઘૂનિ ચત્વારિ ચ દ્વિગુણિતાનિ ।
ગુરુણી લઘૂન્યથાષ્ટૌ ગુરુણી ચેત્યેતત્ ત્રિધા યોજ્યમ્ ॥ ૧૧૦॥

અથવા ।
ચત્વારિ તુ ગુરૂણિ સ્યુર્હ્રસ્વાન્યષ્ટૌ ભવન્તિ હિ ।
ગુરુણી નવ હ્રસ્વાનિ દીર્ઘમન્ત્યમથાપિ ચ ॥

અત્રોદાહરણમ્ ।
દિઙ્ગલે ઝણ્ટું જગતિ ય ।
થલિતક ઝણ્ટું તિતિ ।
ઝલકુચ ઝલતિતિચા ।
બાલાસારિતવચ્ચૈવ તાલોઽસ્ય પરિકીર્તિતઃ ॥ ૧૧૦॥

શ્રવણમધુરાણિ લીલાકૃતાન્યભિસૃતપરિસૃતાન્તરકૃતાનિ ।
તાન્યપ્યર્થવશાદિહ કર્તવ્યાનિ પ્રયોગવિધૌ ॥ ૧૧૧॥

યથાસારિતાનિ જ્યેષ્ઠમધ્યકનિષ્ઠાનિ તાલપ્રમાણનિર્દિષ્ટાનિ તાનિ
તાલવિધાને વક્ષ્યામઃ ।
એવમેતત્ સ્વરગતં જ્ઞેયં વીણાશરીરજમ્ ।
વિપઞ્ચીવાદ્યયુક્તાનિ કરણાનિ નિબોધત ॥ ૧૧૨॥

રૂપં કૃતં પ્રતિકૃતં પ્રતિભેદો રૂપશેષમોઘશ્ચ ।
ષષ્ઠી વૈ પ્રતિશુષ્કા ત્વેવં જ્ઞેયં કરણજાતમ્ ॥ ૧૧૩॥

વીણાવાદ્યદ્વિગુણં ગુરુલાઘવવાદનં ભવેદ્રૂપમ્ ।
રૂપં પ્રતિભેદકૃતં પ્રતિકૃતમિત્યુચ્યતે વાદ્યમ્ ॥ ૧૧૪॥

યુગપત્કૃતેઽન્યકરણં પ્રતિભેદો દીર્ઘલાઘવકૃતઃ સ્યાત્ ।
કૃતમેકસ્યાં તન્ત્ર્યાં પ્રતિશુષ્કા નામ વિજ્ઞેયા ॥ ૧૧૫॥

વીણાવાદ્યવિરામેઽપ્યવિરતકરણં તુ રૂપશેષઃ સ્યાત્ ।
આવિદ્ધકરણયુક્તો હ્યુપર્યુપરિપાણિકસ્ત્વોઘઃ ॥ ૧૧૬॥

કાર્યં ધ્રુવાવિધાને પ્રાયેણ હિ કોણવાદનં તજ્જ્ઞૈઃ ।

સ્થાનપ્રાપ્ત્યર્થં ચેદ્યત્તત્ર ભવેદયં નિયમઃ ॥ ૧૧૭॥

તચ્ચૌઘતુલ્યકરણં વાચ્યં કાર્યં વિપઞ્ચ્યાસ્તુ ।
સપ્તતન્ત્રી ભવેચ્ચિત્રા વિપઞ્ચી તુ ભવેન્નવ ।
કોણવાદના વિપઞ્ચી સ્યાચ્ચિત્રા ચાઙ્ગુલિવાદના ॥ ૧૧૮॥

તતવાદ્યવિધાનમિદં સર્વં પ્રોક્તં સમાસયોગેન ।
વક્ષ્યામ્યતશ્ચ ભૂયઃ સુષિરાતોદ્યપ્રયોગં તુ ॥ ૧૧૯॥

॥ ઇતિ ભરતીયે નાટ્યશાસ્ત્રે તતાતોદ્યવિધાનં નામ
એકોનત્રિંશત્તમોઽધ્યાયઃ ॥

Encoded by Sowmya Krishnapur krsowmya@yahoo at com

---

*Natya Shastra Chapter 29*

pdf was typeset on March 24, 2024

Please send corrections to *sanskrit@cheerful.com*